तं. ४६ ग-१
पाणिनीयशिक्षाटीका
१२ पत्राणि
शिक्षा
ज्योतिर्लिंगी
८.१६.१२ शि.

पाणिनीयशिक्षा टीका नं० ८६
पत्र १२

ॐ श्रीगणाधिपतये नमः कृष्णं कमलपत्राक्षं नत्वा भ
२ क्तवत्सलं पाणिनीयमते शिक्षा तस्या व्याख्या वितन्य
ते १ अथ शिक्षां प्रवक्ष्यामि अत्राथशब्दो ऽनंतर्ये
अनुयंगते मंगलार्थे च वर्त्तते मंगलं हि तत्सद्वलहरी
यमैतत्केवलं शिवं शांतं यदस्याग्रे च यन्मध्ये यच्चान्ते प्र
तिष्ठितं तस्मादादावन्ते मध्ये च तदनुष्ठितं संप्रतिष्ठितं
तं संभवति वागाप्यायते मन आप्यायते प्राणा आप्या
यंते तथाध्येतारो अहरमोदमाना अपहतपाप्मानो हर
भवंति बलमोजो धनं वीर्यं चादिगघंति आयुष्यमारो
ग्यं चादिगंछंति अपतरंति मृत्युं ब्रह्मसायुज्यं चाप्नुवंति
वेदाध्ययनानंतरं अंगपाठस्य विहितत्वात् तथा च म
हाभाष्ये ब्राह्मणेन निष्कारणो धर्मः षडंगो वेदो
ध्येयो ज्ञेयश्चेति निष्कारणमिति प्रयोजनमनपेक्ष्य

त्यर्थः तेषु च शिक्षाग्रंथस्य शिक्षायाऽनंतरं कल्प एवो-
च्येयः नान्यानीति ग्रंथादौ संबंधचतुष्टयं वक्तव्यं त-
त्र संबंधाधिकारिप्रयोजनविषयरूपं तत्र चायमेव सं-
बंधोपकृत्यांगांगिभावः नित्यसंबंधानि ह्यंगान्यंगि-
नः श्रविधेयं लक्षणमेव पाणिनिर्वक्ष्यति वाचउच्चार-
णोविधिमित्यादिना प्रयोजनं च वर्णानां सम्यगु-
च्चारणं प्रयोजनमपि भाष्ये श्रूयते एकोपि वर्णः स-
म्यक्प्रयुक्तः स्वर्गे लोके कामधुग्भवतीति शिक्षते
वर्णोच्चारणमनयासा शीक्षा तां प्रकर्षेण वक्ष्यामि
कथयिष्यामीत्यर्थः पाणिनीयं मतं यस्या पाणि-
नीयमिति तस्येदमित्यर्थे नोर्देशे वृद्धाच्छः इति सू-
त्रेण छ प्रत्ययः मतमिति मननज्ञाने धातुः पाणिनि-
यं मतं ज्ञानं यस्याभवति तस्यातिरूपयिष्यामि नैरव

पा॰ शि॰ प्रत्याहारैरत्र तैवपरिभाषया अचोऽस्पृष्टायरण
टी॰ स्त्वीषन्नेमस्पृष्टाः शरःस्मृतारित्यादि अणइत्सव
२ र्णस्यचाग्रहणाय इति चकं आवहा विवृयश इति
2 तथा अन्यत्र प्रत्यक्ष मंत्र प्रयोजनं यत्तत्व्याकरणा
दवगंतव्यं मोऽनुस्वार इति ननु व्याकरणे शब्दचिंता
शिक्षायामपि सैव तथा च व्याकरणेनैव गतार्थत्वा
त् शिक्षा अप्राप्या इति चेत् सत्यं गोशब्दः सास्ना
दिमत्यर्थे साधुरिति व्याकरणे चिंत्यते शिक्षायां तु
गोशब्दः जिह्वामूलेनोच्चार्य इत्येतत्व्यवृत्तिभेदान्नाप्राप्या
शिक्षा शास्त्रात्पूर्वं तु विद्यात् शास्त्रमिति शास्त्रस्या
नोकरणे सूत्र प्रत्यय आनुपूर्व्यमिति गुरुपूर्वकक्रम
पाणिनीय: परामर्शः पाणिनीयमतस्य यदा तु पूर्वा
योगुरुपूर्वकक्रमस्तेएवास्येत्यर्थः तथा चत्वय
मतस्य = तत्वछेन

त्पत्ति

मेवग्रंथकृत्तवक्ष्यामि शांकरः शांकरीर्य्यदाराद्दतीउ
त्राय धीमते शति यथोक्तंलोकवेदयोः लोकेवेदे
चतामर्थस्तु विहितार्थः तथाचोक्तंभाष्ये यएवलौ
किकाशब्दास्तएववैदिकास्तएवतेषामर्थाइति
ननुयद्यत्वस्यानैनैवक्रमकारादयोवर्णासर्वैरपुच्चार
यंतएव परस्पानस्यनिराकांक्षत्वात पुनरपिशास्त्रा
पार्थेन्याशंक्याह प्रसिद्धमपिशाब्दार्थमवधान
मल्पबुद्धिभिरिति अल्पबुद्धिभिरितिबुद्धिहीनैरज्ञातबुद्धि
ये= भिर्द्धं[illegible]:प्रसिद्धमपिशाब्दार्थंसम्यविततंसंतंपुनःप
ष्यात व्याकरिष्यामि स्पष्टीकरिष्यामीत्यर्थः
किंचवाचोह्यारलोविधिंवाचोगिमः डच्चारलोडज्ज्ञिरलोविधिंविधानं
स्पष्टीकरिष्यामि ननुविधिरत्यंतमप्राप्तौनियमःपाक्षिकेसति चा तत्रः
न्यत्रंचप्राप्तौपरिसंख्येतिगीयते इतिमीमांसकानांविधिशब्दार्थ

पा·नी·शि· स्मयन्ते तथाचात्रापंतप्रोगैरभावात् उक्तंचाधस्तात् अकारा
टी· दयोवर्णाःस्वस्वस्थानेनैवोच्चारयंते इति अत्रोच्यते यद्यपिस्थाना
२ स्थानाउच्चारयंतेतथाप्यत्राप्रांशःकथनीयोप्रदानादिःपदार्थे
3 विधिशब्दः कतिसंख्याकास्तेवर्णायैर्वागुच्चारणं इत्यतत्राह क्रियते
त्रिषष्टिश्चतुःषष्टिर्वावर्णाःशंभुमतेमताः शंभुमतमिति शंभ
तेसकाशात्संमताज्ञाताइत्यर्थः वर्णोवर्णोतेयथोक्तौंलोक
वेदयोरित्युक्ते तत्रलोके किंसंस्कृतविषयाएववर्णाउतसर्वत्रा
थाविषयाइत्याह प्राकृतेसंस्कृतेचापि अपिशब्दादपभ्रंश
शादिष्वप्येकवर्णाःसंमतेजनिताः संतः स्वयंप्रोक्ताःस्वयंभुवा प्र
सिद्धाःस्वयमेवादेशस्यप्रकर्षेणोच्चारिताः कथंत्रिषष्टिःकथंच
चतुःषष्टिरित्याशंक्याह स्वराविंशतिरेकश्च स्वरशब्दोपन्याय
योः स्वयंतिशब्दाः व्यंजनतत्त्वेनिकरणेऽच्प्रत्ययः कथंतेरि
तिचेत् यथाप्रतानुसारेणविहरणेति एकाविंशतिस्वरा अ

३उक्तर एऐचत्वारः ह्रस्वदीर्घप्लुतसभेदेन द्वादशसंख्याकाः संपन्नाः
लृकारस्य दीर्घादयो न संतीति स्मरणात् ह्रस्व एवोपदिश्य
तेल्कारमेलनेन त्रयोदशसंख्याका जाताः एऐओऔसंध्य
क्षराणां संध्यक्षराणामपि ह्रस्वा न संतीति स्मरणात् दीर्घप्लु
ता एवमष्टौ तेन ते अष्टौ ८ पूर्वैस्त्रयोदशभिस्सह मिलित्वा
एकविंशतिः २१ स्पर्शानां पंचविंशतिः २५ कादयो माव
साना स्पर्शाः जिह्वामूलतालुमूर्द्धदंतोष्ठोपरस्पर स्पर्शैरभिव
व्यज्यमानत्वाच्चाविर्भवंतीति स्पर्शाः पूर्वैकविंशत्या सह षट्चत्वा
रिंशत् ४६ यादयश्चस्मन्ता एवौ यकारादयः अष्टसंख्याका भ
वंति यरलवशषसह इति तेषां मध्ये आद्यानां चतुर्णामन्त
स्थसंज्ञा बोध्या उपरितनानां चतुर्णामूष्मणामुत्रिसंख्या बो
ध्या पूर्वसंख्यया षट्चत्वारिंशत्संख्यया सह चतुष्पंचाशत्सं
ख्या बोध्या ५४ चत्वारश्चयमास्स्मृताः यत्नुनीति यमः स्वय

पा. शि. टी. ४ मेवापरमतीत्यर्थः केचोयमाः लोके कुंखुं गुंघुमिति अनन्त्य
श्च भवेत्पूर्वे वीह्य तत्रसपरतो यदि गव्यम ध्ये यमास्तिष्ठे सवर्णा
पूर्ववर्णयोः वर्गान्त्यात् शषसेस्सार्द्ध अनन्त्ये वापि संयुक्तान् ह
५ ह्याया मातिवर्त्तते आदेशिकमिवाध्युगा इति नारदोद्भ्राजिभ्यां
मन्त्रे यमो वर्णागम इति विधीयते अस्मात्पुष्पाद्व्रत्यारभ्य
मास्पृता इति वर्णान्तरत्वेनोपदेशीय संयोगशास्त्रात् अप
चतुरक्षराणामुदाहरणमिति प्रकृत्या अग्निरित्ति यमो गकार
नकारा इति अन्त्ये यमं वर्णान्तरमिति मन्यन्ते तथाच शौन
कः स्पर्शा यमाननुनासिकाः स्वरान्परेष्वनुनासिका स्वरात्य स=
रेफस्पर्शेष्वनुनासिकेष्विति पूर्वोक्ताश्चतुः पंचाशद्भिः सह
अष्टपंचाशत् संख्या वोध्या ५८ सू० अनुस्वारो विसर्गश्च
स्वरं अनुभवतीत्यनुस्वारः वकारानुनागमानुस्वारो व
स्यादित्यादिनमूल्यस्वरानन्त इति विसर्गश्चेति विविधं सृज्यते

द्विप्यतीति विसर्गः मू० कष्वोचापि परास्थितौ इति ककार
पकारौ आश्रयस्थानं ययोस्तौ पराश्रयौ गं यात्ᳲकार उपरिष्टात्त्व
यमेव वक्ष्याति अयोगवाहा विज्ञेया आश्रयस्थानभागि
न इति अपरोपि पाठः कपाभ्यामपि परौ स्मृतौ अनुस्वारवि
सर्गयोः पराश्रयौ अन्योपि पाठः कष्वोचापि परास्थि
तौ ककारपकारौ तदाश्रयस्थानं ययोस्तौ कपाश्रयौ चकारा
दनुस्वारविसर्जनीया इति पराश्रयौ मू० दुःस्पृष्टेति विज्ञे
यो ल्कारः प्लुत एव च दुःस्पृष्टमित्यनेन ईषत्स्पृष्टवर्णधर्मो नर
वर्णान्तरं इति विवक्ष्याति अचोऽस्पृष्टा यरणस्त्वीषदिति तथ्या
चोद्भजः स्पृष्टं करणं स्पर्शानां दुःस्पृष्टमन्तस्थानामिति परा
भक्तिकश्चल्कारो विद्यते अत एव ल्कार दुःस्पृष्टधर्मवान् च
९ शब्देन ऌकारोपि बोध्यः इति शब्दः श्लोकपादपूरणार्थः ल्का
र इति प्लुत एव चेति ल्कारस्य दीर्घाद्योनत्तंसंज्ञीत्सधस्तात्परस्तत
ल्वर्णा ल्कार प्रश्नयेजाते ल्कार इति तिसिद्धं॥

प्लु

पा·शि·टी· लृकारस्य मन्तमाह लृकारः प्लुत एव चेति त्रिमात्रः चकारेण गुरुत्वो
५ पि ननु वर्णानां प्रयत्ना अग्रे वक्ष्यन्ते अत्र प्रयत्नाविचारो
व्यर्थ उच्यते प्लुतादि घोषार्थं तावत् लृकारः उच्चारयितव्याः
उच्चारितेच लृकारे लाघवार्थं अत्र यत्नः उच्चारितः ऌस्पृष्टेश्च
त्रिपदांतरात् ननु अनुस्वारद्वयं कथं ह्रस्वदीर्घप्लुतभेदेन
त्रिषूक्तः अनुस्वारादयः प्लुतांताः पंच एवैषां पंचाशताद्भिः सह
विंशतिः चतुष्षष्टिः कथं अनुस्वारो विसर्गश्चेति उक्तोपि
अनुस्वारोच्चांगामित्यनुस्वारो ह्रस्वदीर्घो दीर्घह्रस्व इति एवं च
तुः षष्टिसंख्यासंपन्नाः अप्य वर्णसंख्या यो घोतरं चिंत्य
ते एषां वर्णानां उच्चारयिता कः कथं च उच्चारयति उच्चारणा
न्यासक्रमकः इत्यत्राह · मू० आत्मा बुद्ध्या समेत्यार्थान् मनो
युंक्ते विवक्षया आत्मा बुद्ध्यैति: आदित्य एवं चंद्रमसा अमृत
मयेचं चंद्रमसो मंडले अनुदिनं कलया कलया प्रतिबिंबित आदित्यो

मा

यस्यांचंद्रत्तामेति चंद्र आदित्यतामेति यदा तु नरसा आदित्यो य
थ्यायोगमप्रतिविवित्तो भवति तदा केवलस्याभासोऽवतिष्ठते २
एवमात्मा बुद्धिसत्वे षोडशकाले प्रतिविंवितो बुद्धित्तामेति बुद्धि
श्चात्मतामेति यदा तु नरसौ यथायोगमप्रतिविवित्तो भवति २
तदा शुद्धो मुक्तः केवलो निरंजनः स्वरूपमात्रज्योतिरवतिष्ठते २
सोयं स्वरूपान्तिनंदः यदा तु नरसौ गच्छति तानंदस्व आनन्दाप्ती २
विषयाननुगच्छति तेमुपरतं मनो नियुंक्ते तदा अपूर्वीर्याग्रो ह क्रो
दस्वानरितपरुषसूचनासंबद्धहिंसादिभिर्दोषैरज्ञानकामैमनु
तृणांपापमेवसंचिनोति यतो वद्धनरकानि रञ्जगादिभयो निभुश्च
मंतनेशांतिमुपलभेत एतां द्वयस्य रागांविषयत्वं श्रुत्वापि कदा
चिज्ञानकाम्यं तदा परावतेमयाति मतो तस्मात् सं यथायथ्यातयात्या
आनंदोदयो भवति इति अज्ञानाद्विषयेभ्यः तत्सिद्धिमन्यमानः
पुनः रस्तेषु प्रवर्तते विवर्तयतो विवर्तितं तत्त्वं केनेतिं सर्वो धर्मांवा

लोभ—६

पा॰ शि॰ टी॰ ६ 6

वर्णमनुक्रमेणास्मरत्यादीततोमनःसारथिवत्कायाग्निमाहन्ति
सोनुरूपंमारुतंप्रेरयतिसारथिर्यथाश्वान्प्रेरयतितद्वत् रथिनाति
योजितोभिमतोत्रातेषुयथाहंरश्मिभिश्चतेहूतिरश्मयोश्वयान्
तेचयथाययथाविषयानभिलिरहरन्तितद्वत्समनातयेनाद्विषयान्
रेभुक्तदेतदुक्तंदेवीवाचमजनयन्तदेवा इति देवीसत्यसंहिता
मित्यर्थः मनुकपंशरीरेंद्रियमनोव्यतिरिक्तआत्मा उच्यते द्रष्टृ
त्वाद्द्रष्टाहिदृश्याव्यतिरिक्तोभवतिप्रयोजकत्वात् बुद्ध्यादीति
कर्तृप्रयोज्यानिकरणानित्वात् कुठारवत् इतिन्यायात् शरीरेन्द्रिय
व्यतिरिक्तआत्मासिद्धः श्रुतेश्च नस्यहैतस्यहृदयस्याग्रं क
थमुद्घारयतिकेनक्रमेणेतिप्रश्नाद्यस्योत्तरमाह सात्मा
त्माबुद्ध्यार्थान्त्वात् समेत्यसम्यगवगम्य अर्थप्रत्या
यतायपदिशब्दाउच्चार्यन्ते मनोयुङ्क्ते विवक्षयात्मन
मनोनियुङ्क्ते आत्माबुद्ध्या अर्थान्त्वात् सम्यगवगम्य

मू० मनःकायाग्निमाहंति मनःमनो प्रेरितःसन्ः कायाग्
निमाहंति शरीराग्निं आभिघातेनाहंति ७ मू० सप्रेर
यतिमारुतं सोग्निप्रेरितः सन्मारुतंवायुंप्रेरयति (सवा
युप्रेरितःसन्) मू० मारुतस्तूरसिचरन्मन्द्रंजनयतिस्वरम्
अग्निप्रेरितःवायुः उरसिचरन्सन् मंद्रंस्वरंनिष्पादयति
मंदेरकप्रत्ययः मंद्रमिति मू० प्रातःसवनयोगंतं छंदोगा
यत्रमाश्रितं प्रातःसवनेनयोगोस्यास्तीतिप्रातःसवनयोगः
गायत्रं छंदोस्याश्रयः गायत्रंगायते आच्छादनाच्छं
दः मू० कण्ठेमाध्यन्दनयुगंमध्यमंत्रैष्टुभानुगं मारुत
इत्यनुवर्तते सवनं छन्दश्चचरन् वर्णान् जनयतिकण्ठे चर
न्वायुर्मध्यमंस्वरंजनयति कण्ठेष्ठन्प्रत्ययेकृतेकण्ठ इति
सिद्धं मध्यमंपुनस्तानितिमाध्यन्दिनं सवनभाजं त्रिष्टुभश्छं
दोनुगामिनं मू० तारंतार्तीयसवनं शीर्षण्यंजागतानुगं

तृतीयसवनमिति तृतीयसवनभाजं तारंस्वरंस्हर्ध्विचर
गसत्रूवायुर्जनयति उत्पादयतीत्यर्थः जागतंछंदो१
नुगामिनं जागतंछंदोनुगच्छतीतिजागतानुगः शीर्ष
ण्यमिति शीर्षेभवंदसीतिसूत्रेणयत् शिरःशब्दस्यस्थाने१
शीर्षन् आदेशोभावः शीः तत्रभवः शीर्षण्यः मू० सोदीर्णो
मूर्ध्न्यभिहतोवक्त्रमापद्यमारुतः वर्णान्जनयते सः का
यौग्निप्रेरितोवायुरुदीर्णः ऊर्ध्वंहृत्पतनेकमारुतःतस्यप्रतिघ
तेनपुनर्मारुतस्यमुखंविस्पष्टप्राप्तेपत्यर्थे तेषांविभागः
पंचधास्मृतः इतिमूलः यथाजायमानस्यजंतोः हस्तपादादयो
निश्चेष्टाश्चेष्टाइत्येतेसहजाधर्माः एवं तेषांजन्यमाना
नांवर्णानांविभागः विवेकःकैःकारणैर्भवतीत्याह मू० स्व
रतःकालतःस्थानात् प्रयत्नानुप्रदानतः स्वस्थानेहेतुंव्या
ख्यास्यामः मू० इतिवर्णविदःप्राहुर्निपुणंतन्निबोधत त
ण

पा. शि. ८
गतः सन् मूर्धानं यावत् तदुपरि
नतां गतिमालभमानः शिरःकपाले
नाघतत्वात् उक्तः गत्याश्लवक्त्रमेवापद्यव
र्णान् उत्पादयति सोदीर्णो

रीपादमाचार्य आह त्रिगुणं त्रिविधो घोषेति वर्णोहात्तार आचा
र्यः वर्णानां विवेकः पंचधा आह तेषां वर्णानां पंचधा वि
वेको त्रिगुणमुच्यमानं भो शिष्याः निबोधत स्वरेषु उदात्त
अनुदात्त स्वरित अस्वरास्त्रयः ह्रस्वो दीर्घः प्लुत इति कालतो
नियमात् अचि वृत्ति मूलः आख्याति निर्वचनात् स्वरास्ततो वा
रजंतो स्विति वाहुल्यात् स्वरइत्युच्यंते दैर्घ्याद्दीर्घः प्लवनात् प्लुतः
पर्यासविकर वर्णानि होभवंति स्वराणाम् सविबोध्यं सिद्धां
ते हि तत् श्लोकेन विवरणोक्ति कालत इति स्वर उदात्तादिः कालो
मात्र प्रभृति त्रिमात्रपर्यंतः उदात्त इत्युपरि स्थापरिगृहीतः
अनुदात्तात् विपरीतः अधस्तात् उदाहृत्त इत्यर्थः स्वरित इति
स्वरांतरं न स्वरे इत्यनेन स्वरितो ग्राह्यः इत्योनिष्पाद्य उदात्तानु
दात्त विकारः नारदोप्याह उच्चाउच्चतरं नाचा नीचतरं त
त्रैस्वैर्य स्वरसंतानो विन्यान स्वरउच्यते उच्चनीचस्य योर्मध्ये

पा॰ शि॰ साधारणाँ इति श्रुतिः सस्वरं स्वरसंज्ञायां प्रातिज्ञानं तित्तिरीयशिक्ष
टी॰ काः त्रयस्वरा इति त्रय एव स्वरा ऋग्वेदे पंचयजुर्वेदे सप्त
८ सामवेदे एकमात्रो ह्रस्वः द्विमात्रो दीर्घः त्रिमात्रः प्लुतः विष
8 ममात्रास्स्यादित्येके ब्रुविः नारदोप्याह॰ निमेषः कालमात्रे
स्यात् विद्युत्कालेपि वा परः इति शब्दं प्रकारे अनेन प्रकारेण
कालतो हेतोः स्वरितः स्यात् विषयएवविभाषानियमः
नारदोप्याह॰ स्वर उच्चात् स्वरो नीचः स्वरः स्वरित एव च व्यंजना
नान्यवत्त्रवर्तिते नित्यानित्यंति सस्वरा इति स्थानत्रय इतियदुक्त
तदाह अकारः शब्दतत्त्वमात्रबीजं उकारो रूपतन्मात्रबीजं
ऋकारस्तत्तन्मात्रबीजं लृकारो गंधतन्मात्रबीजम् ततो
वायवः पंचभूतास्ततः शषसह इति वर्णोत्पत्तिमाह॰ मू॰
कंठावहाविचुयशास्तालव्याओष्ठजावुपु स्थानंकरात्कादि
कंठावहावित्ति अकारहकारोकएऔओकराबन्द्वन्त्यौ स्थयाः

शास्तालव्याः इकारश्चवर्गीययकारशकारौ चैतेतालव्याः तालु
स्थानादुत्पन्ना उकारात्तवर्गोष्ठावर्गे स्थापयति वर्णादावन्त्यवा
पि चुटूह्रस्वेवमादिषु पाणिनिरप्याह ऋराठदिसवर्णस्य
वर्णात्ययइति कोदद्याजिरपि स्पर्शवर्गस्यस्पर्शग्रहणेच
तेयवर्गस्यग्रहणं स्थानेष्वादिकारइति ओष्ठजाउपू उकारः
पशब्देनपवर्गाः एतेओष्ठ्यौजातौ मू· ऋमूर्धन्याऋटुरषा
ऋकारश्चटवर्गश्चरेफषकारौएतेषांमूर्धन्यस्थानं मू· दं
त्यालृतुलसास्मृताः लृकारश्चतवर्गश्चलकारसकारौ एते
वर्णादंतेषुभवाः मू· जिह्वामूलेतुकुःप्रोक्ता कवर्गस्यजि
ह्वामूलीयंस्थानंबोध्यं मू· दंत्योष्ठ्योवःस्मृतोबुधैः वकारो
दंत्योष्ठ्याः दंतेभ्यो ओष्ठाभ्यां चजातइति विद्वद्भिः स्मर्यते ए
ऐतुकंठतालव्यौ इति मू· एकारऐकारौकंठतालोरुत्पन्नौ।
मू· ओऔकंठोष्ठजौस्मृतौ ओकारऔकारयोः कंठोष्ठस्थानं

पा॰ शि॰ वोधं सू॰ अर्धमात्रात्मकंस्यादेकार ऐकारयोर्भवेत्
टी॰ अर्धमात्राकंठाभवति एकारस्यओकारस्यचसवर्णग्राहक
९ त्वात् ऐकारऔकारयोर्ग्रहावपिग्रहणेन अतएवचतुर्णामपिसंध्य
१ क्षराणांचअर्धमात्रासंबंधनीभवेत् अर्धचंद्रत्वेवस्यान्तेः
सू॰ अयोगवाहाविज्ञेयाआश्रयःस्थानभागिनः अयोग
वाहाइतिशब्देनअनुस्वारादयश्चत्वारः अनुस्वारविसर्गश्च
कपौच शोदश्चजिरपि ते चायोगवाहः अः इतिविसर्जनीयः
ᳵक इतिजिह्वामूलीयः ᳵप इत्युपध्मानीयः अं इत्यनुस्वारो
नुनासिकः इत्ययोगवाहाः नाविघ्नतेयोगःसंयोगःवर्णैर्नते
षासहयेवर्तन्तेअयोगवाहाः आश्रयस्थानभागिनइति क
कारादेराश्रयस्यस्थानंभजंतिएवंशीलायेतेआश्रयःस्था
नभागिनःकथ्यंतेअन्येत्वयमानपिअयोगवाहानाहुःते
तेषांमतेअयोगवाहशब्दोनप्रशस्तमितिरूढ्याबद्धश्च

एवंवेदितव्याः अनुस्वारस्यस्वरूपंसोनुस्वारइतिसूत्रंवदतः
सूत्रकृतैवदर्शितं सू॰ अलाबुवीणानिर्घोषोदंत्यमूलस्था
यानव अनुस्वारप्रकाशकोनित्यंह्येशष्षसेषुच अलाबुवीणा
निर्घोषइति अलाबुतुंबः तस्यवीणा तस्यानिर्घोषःशब्दः
यस्यासौअलाबुवीणानिर्घोषः दंतमूलेभवंदंत्यमूलंस्था॥
नं सू॰ अष्टौस्थानानिवर्णानामुरःकंठशिरस्तथा जिह्वामू
लंचदन्ताश्चनासिकौष्ठौचतालुच पूर्वोक्तानांस्थानानामनु
वादस्वरूपमिदं स्वरतःकालतःस्थानतोवर्णानांभेदोनिरूप
तः अधुनाप्रयत्नभेदःनिरूप्यते प्रकृष्टोयत्नःप्रयत्नःप्रकर्षेण
यत्नःउच्चारणेप्रतिनियतःस्थादशभिःप्रकारैःसप्रयत्नोनेः सू॰
अचोस्पृष्टायणःत्वीषत्तुनेमः स्पृष्टाःप्रोक्तास्तथा अजिति
प्रत्याहारग्रहणं अइउऋऌएओऐऔ एतेअच्संज्ञकाः अस्पृ
ष्टाःकथ्यंते यरलवेतिप्रत्याहारः यरलवएतेईषत्स्पृष्टाः ञ

पा. शि. रिति प्रत्याहारः शषसह एतैर्नेमस्पृष्टाः नेमशब्दः सर्वादिगण
टी. णोसर्वार्द्धार्थेवर्त्तते तेनार्द्धस्पृष्टा इत्यर्थः शषसस्त्वर्धेत्येक
९. यंपादस्पृष्टा मू० शेषाःस्पृष्टा हलः प्रोक्ता हलिति प्रत्याहारः
हकारादारभ्यलकारपर्यंतं शिष्यते परिशिष्यन्ते इति शेषाः
10 उपर्युक्तादन्या इत्यर्थः यराः शषसहाई षदस्पृष्टा तदुक्तरिवा
हलः स्पृष्टाः स्वस्थाने काप्यन्ते मू० निबोधानुप्रदानतः अनु
प्रदानमिति स्वस्थानादिकं घोषादिकंच अनुप्रकर्षेणादी
यते इति अनुप्रदानं श्वोदवाजिरपिनादनुप्रदान इत्येदवा
त्रि अनुप्रदान हलो वर्णानांभेदं प्रयुक्त मू० यमोनुनासि
कानहौनादिनौ हझषः स्पृष्टाः यमिति प्रत्याहारः अनुना
सिका इति स्वनेरधिकारा दनुपाठादनुनासिका भवंतीत्यनुना
सिकाः अमङणनमोहनासिकान्विजानीयात् पाणिनि
रप्याह अवनासिकावचनोनुनासिक इति अहइति अकारो

रेफहकारौ शषसश्च प्रत्याहारग्रहणं कषकयघठधव
एतेऽघ्रकाशादयोनादिनः स्मर्यन्ते नादएषामस्तीतिनादिनः
पाठांतरमाह॰ अमोनुनासिकानह्रौ अमितिप्रत्याहारः
अइउणऋऌक्एओङ्ऐऔच्हयवरट्लण्ञमङणनम् एतेऽनुनासिका
नहोनतुरेफहकारौ अतावायसंनोन्नासिको हकमः स्मृताः
हकारो जघञ्जनादिनः जघकमघठधष अस्याद्यपाठवयात्
आसौ रेफवर्जितानांविकल्पेनानुनासिकत्वं शौनकोप्याह
यवादयोप्यविहितानुविधत्तयः लुप्तोपधानानुनासिकोपधा
इति तथाङकारैश्चेतिकरणेनयुक्तोप्येतौराधितांगौकालेते शाः
नि मकाररेफयोःप्रथमपाठे द्वितीयपाठेहकाररेफयोरननुना
सिकत्वप्रतिषेधः सू॰ ईषन्नादायणोयरुश्च यणः शोषिणा ज
वस्तजकारादयाः शकारेराप्रत्याहृताः जबगडदश एतेयणो
यश्च ईषन्नमनोनादाः सू॰ स्वासिनस्तकरखफादयः खफाद

11

पा॰ शि॰ यरन्ति खफछठथ्याः एते श्वासिनः श्वासः एषामस्तीति श्वासि

टी॰ नः श्वासघोषाणां मध्ये या प्रयत्नमानाम घोषसंज्ञकं पूर्वेषां पु

ग्माः शोष्माणश्चोदृक्जी ईषच्छ्वासांश्चरो विद्यात् इति मू॰

चरिति प्रत्याहारः ग्रहणं चटतकपशषसर एतान्ममवाक

श्वासान् जानीयाः मू॰ गोर्धामैतत्प्रचक्षते गोर्वाचो धामस्था

नं गोरर्थस्यानिगमनादित्यर्थः अत्र धामशब्देन स्थानं ग्रहणं च॥ प्रचक्षते

व्यक्षाचक्षते वर्णविदः शास्त्रानुपूर्वीमिति उक्ताः वर्णाः अधु

नागुरुपूर्वक क्रमं निरूप्यते मू॰ शंकरः शांकरीं प्रादाद्दाक्षी

पुत्राय धीमते शंकरः सुखकरः शिवः शांकरीं सुखकरीं विद्यां

ऋषये दाक्षिपुत्राय दाक्षिनाम्नी का काचित् ऋषिकन्या तत्

पुत्राय प्रादात् दत्तवान् धीमते बुद्धिमते॥ संप्रति पाणिनिस्तु

तिपरं श्लोकमाह॰ येनाक्षरसमाम्नायमधिगम्य महेश्वरात् कृ

त्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥ १ मयप्रकृतस्तोत्

पूर्वोक्तं पाणिनिनेनमस्कारकरणं किमुच्यते अक्षरसमाम्नाय
रणाहृत्र्यणादिप्रत्याहारैः शिक्षाप्रथिताः प्रत्याहाराश्चपा
णिनिना शंकरादधिगम्य व्याकरणं प्रोक्तं शिक्षोपकारश्च
प्रत्याहारा लोके प्रवर्तिताः अतो युक्ता स्तुतिः अक्षरसमाम्ना
यकृत्य प्रत्याहाराणां कृत्स्नमिति आत्मनं वाहस्पत्यं ऐंद्रं
चांद्रं आर्षं चेति येन धौता गिरः पुंसां विमलैः शब्दवारिभिः
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः २ पुंसां जीवानां
विमलैर्गुणवद्भिः गुणाश्च सौगंधमाधुर्यमारोग्यं हेमल
घुत्वं स्थैर्यं चेति चोच्यते विद्वल पात्नीति वा धौताः कल्याण
रागदूषणाः कृत्ताः यतः कल्याणशब्दः प्रयुक्तं प्रलयाजने प्रयोक्ता
चभ्राजमानो भवति देववत्संप्रयोगात्महदभ्युदयं चाप्नोति २
तिशारदः प्रशंसा अप्यार्थेनार्थप्रशंसामाह (तमश्चाज्ञानजं
भिन्नं) तमश्चेति यथोद्यता भास्करेण यातिरवाहतं तमः संहत

पा॰ शि॰ सेयोरातिशायाप्यत्नीयतेन यास्त्रवि धीक्षुद्रः स्खलतांसे
टी॰ भवनसमोरासंचयेतापत्नीयेन नसैनसोर्थवाक्करणात्वे
२२ शीत्कटयेयेत्रक्षोसि पौनमस्तुर्भः तच्चापस्क्रानिः शाक्षोमित्रः
संवरणाः शाक्षोमवत्त्वर्थमाधात्रइंद्रोबृहस्पतिः शाक्षोविस्त
12 रुतत्रामः इतिश्वाख्यायाहि॰ मू॰ त्रिनयनमभिमुखमेनिस्
मामिनापादिस्लोकेनसादाहत्तलिमाह॰ त्रिनयनमुखवादि
त्रिवच्चारूत्रयाः इति हेतिमक्रामाति तच्चात्रिनयनेनाविः
कृते त्वर्थः कृते त्वर्थत्तांयः पठेत्सुधीयनेशोधनादि
भिर्युज्यते शुचिः शुचौदेशे समासीनः प्राङ्मुखः पवि
त्रपाणिः आचार्यवान् योवा इमांकल्याणींवाचंदेवीं
महरहः अधीते सइहपरस्मात्लाहि मा महताम्थयेरासंपूज्य
ते यशस्वी धनीच पर्यायीभवति पश्चात्पुण्यात्मभवानेन
कृतं परमानंदं मोक्षापरानंदलब्ध्ये स्वर्गादिकसंवरामित

कोलान्नमोक्षफलंशक्यते मोक्षाख्यंसुखं
अपरिमितकालंअपरिच्छिन्नरूपंसुखमिति